श्री आदित्य कवचं

श्री आदित्य कवचं

अस्य श्री आदित्यकवचस्तोत्रमहामंत्रस्य अगस्त्यो भगवानृषिः अनुष्टुप्छंदः आदित्यो देवता श्रीं बीजं णीं शक्तिः सूं कीलकं मम आदित्यप्रसादसिद्ध्यर्थे जपे विनियोगः |

ध्यानं –
जपाकुसुमसंकाशं द्विभुजं पद्महस्तकं |
सिंदूरांबरमाल्यं च रक्तगंधानुलेपनं || 1 ||

माणिक्यरत्नखचितसर्वाभरणभूषितं |
सप्ताश्वरथवाहं तु मेरुं चैव प्रदक्षिणं || 2 ||

देवासुरवरैर्वंद्यं घृणिभिः परिसेवितं |
ध्यायेत् पठेत् सुवर्णाभं सूर्यस्य कवचं मुदा || 3 ||

अथ कवचं –
घृणिः पातु शिरोदेशे सूर्यः पातु ललाटकं |
आदित्यो लोचने पातु श्रुती पातु दिवाकरः || 4 ||

घ्राणं पातु सदा भानुः मुखं पातु सदा रविः |
जिह्वां पातु जगन्नेत्रः कंठं पातु विभावसुः || 5 ||

स्कंधौ ग्रहपतिः पातु भुजौ पातु प्रभाकरः |
करावब्जकरः पातु हृदयं पातु नभोमणिः || 6 ||

द्वादशात्मा कटिं पातु सविता पातु सक्थिनी |
ऊरू पातु सुरश्रेष्ठो जानुनी पातु भास्करः || 7 ||

जंघे मे पातु मार्तांडो गुल्फौ पातु त्विषां पतिः |
पादौ दिनमणिः पातु पातु मित्रोऽखिलं वपुः || 8 ||

आदित्यकवचं पुण्यमभेद्यं वज्रसन्निभं |
सर्वरोगभयादिभ्यो मुच्यते नात्र संशयः || 9 ||

संवत्सरमुपासित्वा साम्राज्यपदवीं लभेत् |
अशेषरोगशांत्यर्थं ध्यायेदादित्यमंडलं || 10 ||

आदित्य मंडल स्तुतिः –
अनेकरत्नसंयुक्तं स्वर्णमाणिक्यभूषणं |
कल्पवृक्षसमाकीर्णं कदंबकुसुमप्रियं || 11 ||

सिंदूरवर्णाय सुमंडलाय
सुवर्णरत्नाभरणाय तुभ्यं |
पद्मादिनेत्रे च सुपंकजाय
ब्रह्मेंद्र-नारायण-शंकराय || 12 ||

संरक्तचूर्णं ससुवर्णतोयं
सकुंकुमाभं सकुशं सपुष्पं |
प्रदत्तमादाय च हेमपात्रे
प्रशस्तनादं भगवन् प्रसीद || 13 ||

इति श्री आदित्य कवचं |